# shrI mUkAmbikA pancharatna stotram

# શ્રીમૂકામ્બિકા પઞ્ચરત્ન સ્તોત્રમ્

## Document Information

Text title : Mukambika Pancharatna stotra

File name : mUkAmbikA5.itx

Category : pancharatna, devii, otherforms, devI, shankarAchArya

Location : doc_devii

Author : Shankaracharya

Proofread by : Shree

Description-comments : Mookambika Pancharatna Stotram

Latest update : August 3, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 3, 2020

*sanskritdocuments.org*

# શ્રીમૂકામ્બિકા પઞ્ચરત્ન સ્તોત્રમ્

મૂલામ્ભોરુહમધ્યકોણવિલસત્ બન્ધૂકરાગોજ્જ્વલાં
જ્વાલાજાલજિતેન્દુકાન્તિ લહરીં આનન્દસન્દાયિનીમ્ ।
હેલાલાલિતનીલકુન્તલધરાં નીલોત્પલીયાંશુકાં
કોલ્લૂરાદ્રિનિવાસિનીં ભગવતીં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૧॥

બાલાદિત્ય નિભાનનાં ત્રિનયનાં બાલેન્દુનાભૂષિતાં
નીલાકારસુકેશિનીં સુલલિતાં નિત્યાન્નદાનપ્રદામ્ ।
શઙ્ખં ચક્રગદાઽભયં ચ દધતીં સારસ્વતાર્થપ્રદાં
તાં બાલાં ત્રિપુરાં શિવેનસહિતાં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૨॥

મધ્યાહ્નાર્કસહસ્રકોટિસદૃશાં માયાન્ધકારસ્થિતાં
માયાજાલવિરાજિતાં મદકરીં મારેણ સંસેવિતામ્ ।
શૂલમ્પાશકપાલપુસ્તકધરાં શુદ્ધાર્થવિજ્ઞાનદાં
તાં બાલાં ત્રિપુરાં શિવેનસહિતાં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૩॥

કલ્યાણીં કમલેક્ષણાં વરનિધિં મન્દાર ચિન્તામણિં
કલ્યાણી ધનસંસ્થિતાં ધનકૃપાં માયાં મહાવૈષ્ણવીમ્ ।
કલ્યાણીં ભગવતીં વિકર્મશમનાં કાઞ્ચીપુરીં કામદાં
કલ્યાણીં ત્રિપુરાં શિવેન સહિતાં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૪॥

કાલામ્ભોધરકુન્તલાં સ્મિતમુખીં કર્પૂર હારોજ્જ્વલાં
કર્ણાલમ્બિતહેમકુણ્ડલધરાં માણિક્ય કાઞ્ચીધરામ્ ।
કૈવલ્યૈક્યપરાયણાં કલમુખીં પદ્માસને સંસ્થિતાં
તાં બાલાં ત્રિપુરાં શિવેનસહિતાં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૫॥

મન્દાર કુન્દ કુમુદોત્પલ મલ્લિકાબ્જૈઃ
શૃંગાર વેષ સુર પૂજિત વન્દિતાગ્રીમ્ ।
મન્દાર કુન્દ કુમુદોત્પલ સુન્દરાઙ્ગી
મૂકામ્બિકે મયિ નિ દેહિ કૃપા કટાક્ષમ્ ॥

This pancharatna is similar to Mookambika Stotram
Verses 1,2,3,6 and 7 with slight variation.

---

*shrI mUkAmbikA pancharatna stotram*

pdf was typeset on August 3, 2020

Please send corrections to *sanskrit@cheerful.com*